# Maitreyi Upanishad

# મૈત્રેય્યુપનિષત્

## Document Information

Text title : maitreyyupaniShat

File name : maitreyi.itx

Category : upanishhat

Location : doc_upanishhat

Author : Traditional

Description-comments : Essence of the Devi Mahatmyam

Latest update : January 5, 2000

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

September 17, 2023

*sanskritdocuments.org*

Maitreyi Upanishad

# મૈત્રેય્યુપનિષત્

શ્રુત્યાચાર્યોપદેશેન મુનયો યત્પદં યયુઃ ।
તત્સ્વાનુભૂતિસંસિદ્ધં સ્વમાત્રં બ્રહ્મ ભાવયે ॥

ૐ આપ્યાયન્તુ મમાઙ્ગાનિ વાક્પ્રાણશ્ચક્ષુઃ શ્રોત્રમ્ ।
અથો બલમિન્દ્રિયાણિ ચ સર્વાણિ સર્વં બ્રહ્મોપનિષદં
માહં બ્રહ્મ નિરાકુર્યામ્ । મા મા બ્રહ્મ નિરાકરો-
દનિરાકરણમસ્તુ । અનિરાકરણં મેઽસ્તુ । તદાત્મનિ નિરતે
ય ઉપનિષત્સુ ધર્માસ્તે મયિ સન્તુ  તે મયિ સન્તુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ બૃહદ્રથો વૈ નામ રાજા રાજ્યે જ્યેષ્ઠં
પુત્રં નિધાપયિત્વેદમશાશ્વતં મન્યમાનઃ
શરીરં વૈરાગ્યમુપેતોઽરણ્યં નિર્જગામ । સ તત્ર
પરમં તપ આસ્થાયાદિત્યમીક્ષમાણ ઊર્ધ્વબાહુ-
સ્તિષ્ઠત્યન્તે સહસ્રસ્ય મુનિરન્તિકમાજગામાગ્નિ
રિવાધૂમકસ્તેજસા નિર્દહન્નિવાત્મવિદ્ભગવાઞ્છા-
કાયન્ય ઉત્તિષ્ઠોત્તિષ્ઠ વરં વૃણીશ્વેતિ
રાજાનમબ્રવીત્સ તસ્મૈ નમસ્કૃત્યોવાચ
ભગવન્નાહમાત્મવિત્ત્વં તત્ત્વવિચ્છૃણુમો વયં
સ ત્વં નો બ્રૂહીત્યેતદ્વૃત્તં પુરસ્તાદશક્યં મા
પૃચ્છ પ્રશ્નમૈક્ષ્વાકાન્યાન્કામાન્વૃણીશ્વેતિ
શાકાયન્યસ્ય ચરણાવભિમૃશ્યમાનો
રાજેમાં ગાથાં જગાદ ॥ ૧॥

અથ કિમએતૈર્માન્યનાં શોષણં મહાર્ણવાનાં
શિખરિણાં પ્રપતનં ધ્રુવસ્ય પ્રચલનં સ્થાનં
વા તરૂણાં નિમજ્જનં પૃથિવ્યાઃ સ્થાનાદપસરણં

સુરાણાં સોઽહમિત્યેતદ્વિધેઽસ્મિન્સંસારે કિં
કામોપભોગૈર્યૈરેવાશ્રિતસ્યાસકૃદુપાવર્તનં
દૃશ્યત ઇત્યુદ્ધર્તુમર્હસીત્યન્ધોદપાનસ્થો ભેક
ઇવાહમસ્મિન્સંસારે ભગવંસ્ત્વં નો ગતિરિતિ ॥ ૨॥

ભગવચ્છરીરમિદં મૈથુનાદેવોદ્ભૂતં સંવિદપેતં
નિરય એવ મૂત્રદ્વારેણ નિષ્ક્રાન્તમસ્થિભિશ્ચિતં
માંસેનાનુલિપ્તં ચર્મણાવબદ્ધં વિણ્મૂત્રવાતપિત્ત-
કફમજ્જામેદોવસાભિરન્યૈશ્ચ મલૈર્બહુભિઃ
પરિપૂર્ણમેતાદૃશે શરીરે વર્તમાનસ્ય ભગવંસ્ત્વં
નો ગતિરિતિ ॥ ૩॥

અથ ભગવાઞ્છકાયન્યઃ સુપ્રીતોઽબ્રવીદ્રાજાનં
મહારાજ બૃહદ્રથેક્ષ્વાકુર્વંશધ્વજશીર્ષાત્મજ્ઞઃ
કૃતકૃત્યસ્ત્વં મરુન્નામ્નો વિશ્રુતોઽસીત્યયં
ખલ્વાત્મા તે કતમો ભગવાન્વર્ણ્ય ઇતિ તં હોવાચ ॥

શબ્દસ્પર્શમયા યેઽર્થા અનર્થા ઇવ તે સ્થિતાઃ ।
યેષાં સક્તસ્તુ ભૂતાત્મા ન સ્મરેચ્ચ પરં પદમ્ ॥ ૧॥

તપસા પ્રાપ્યતે સત્ત્વં સત્ત્વાત્સમ્પ્રાપ્યતે મનઃ ।
મનસા પ્રાપ્યતે હ્યાત્મા હ્યાત્માપત્ત્યા નિવર્તતે ॥ ૨॥

યથા નિરિન્ધનો વહ્નિઃ સ્વયોનાવુપશામ્યતિ ।
તથા વૃત્તિક્ષયચ્ચિત્તં સ્વયોનાવુપશામ્યતિ ॥ ૩॥

સ્વયોનાવુપશાન્તસ્ય મનસઃ સત્યગામિનઃ ।
ઇન્દ્રિયાર્થવિમૂઢસ્યાનૃતાઃ કર્મવશાનુગાઃ ॥ ૪॥

ચિત્તમેવ હિ સંસારસ્તત્પ્રયત્નેન શોધયેત્ ।
યચ્ચિત્તસ્તન્મયો ભવતિ ગુહ્યમેતત્સનાતનમ્ ॥ ૫॥

ચિત્તસ્ય હિ પ્રસાદેન હન્તિ કર્મ શુભાશુભમ્ ।
પ્રસન્નાત્માત્મનિ સ્થિત્વા સુખમક્ષયમશ્નુતે ॥ ૬॥

સમાસક્તં યદા ચિત્તં જન્તોર્વિષયગોચરમ્ ।
યદ્યેવં બ્રહ્મણિ સ્યાત્તત્કો ન મુચ્યેત બન્ધનાત્ ॥ ૭॥

હૃત્પુણ્ડરીકમધ્યે તુ ભાવયેત્પરમેશ્વરમ્ ।

સાક્ષિણં બુદ્ધિવૃત્તસ્ય પરમપ્રેમગોચરમ્ ॥ ૮॥

અગોચરં મનોવાચામવધૂતાદિસમ્પ્લવમ્ ।
સત્તામાત્રપ્રકાશૈકપ્રકાશં ભાવનાતિગમ્ ॥ ૯॥

અહેયમનુપાદેયમસામાન્યવિશેષણમ્ ।
ધ્રુવં સ્તિમિતગમ્ભીરં ન તેજો ન તમસ્તતમ્ ।
નિર્વિકલ્પં નિરાભાસં નિર્વાણમયસંવિદમ્ ॥ ૧૦॥

નિત્યઃ શુદ્ધો બુદ્ધમુક્તસ્વભાવઃ
 સત્યઃ સૂક્ષ્મઃ સંવિભુશ્ચાદ્વિતીયઃ ।
આનન્દાબ્ધિર્યઃ પરઃ સોઽહ-
 મસ્મિ પ્રત્યગ્ધાતુર્નાત્ર સંશીતિરસ્તિ ॥ ૧૧॥

આનન્દમન્તર્નિજમાશ્રયં ત-
 માશાપિશાચીમવમનયન્તમ્ ।
આલોકયન્તં જગદિન્દ્રજાલ-
 માપત્કથં માં પ્રવિશેદસઙ્ગમ્ ॥ ૧૨॥

વર્ણાશ્રમાચારયુતા વિમૂઢાઃ
 કર્માનુસારેણ ફલં લભન્તે ।
વર્ણાદિધર્મં હિ પરિત્યજન્તઃ
 સ્વાનન્દતૃપ્તાઃ પુરુષા ભવન્તિ ॥ ૧૩॥

વર્ણાશ્રમં સાવયવં સ્વરૂપ-
 માદ્યન્તયુક્તં હ્યતિકૃચ્છ્રમાત્રમ્ ।
પુત્રાદિદેહેષ્વભિમાનશૂન્યં
 ભૂત્વા વસેત્સૌખ્યતમે હ્યનન્ત ઇતિ ॥ ૧૪॥ ૪॥

ઇતિ પ્રથમોઽધ્યાયઃ ॥ ૧॥

અથ ભગવાન્મૈત્રેયઃ કૈલાસં જગામ તં ગત્વોવાચ
ભો ભગવન્પરમતત્ત્વરહસ્યમનુબ્રૂહીતિ ॥

સ હોવાચ મહાદેવઃ ॥

દેહો દેવાલયઃ પ્રોક્તઃ સ જીવઃ કેવલઃ શિવઃ ।
ત્યજેદજ્ઞાનનિર્માલ્યં સોઽહમ્ભાવેન પૂજયેત્ ॥ ૧॥

અભેદદર્શનં જ્ઞાનં ધ્યાનં નિર્વિષયં મનઃ।
સ્નાનં મનોમલત્યાગઃ શૌચમિન્દ્રિયનિગ્રહઃ ॥ ૨॥

બ્રહ્મામૃતં પિબેદ્ભૈક્ષમાચરેદ્દેહરક્ષણે ।
વસેદેકાન્તિકો ભૂત્વા ચૈકાન્તે દ્વૈતવર્જિતે ।
ઇત્યેવમાચરેદ્ધીમાન્સ એવં મુક્તિમાપ્નુયાત્ ॥ ૩॥

જાતં મૃતમિદં દેહં માતાપિતૃમલાત્મકમ્ ।
સુખદુઃખાલયામેધ્યં સ્પૃષ્ટ્વા સ્નાનં વિધીયતે ॥ ૪॥

ધાતુબદ્ધં મહારોગં પાપમન્દિરમધ્રુવમ્ ।
વિકારાકારવિસ્તીર્ણં સ્પૃષ્ટ્વા સ્નાનં વિધીયતે ॥ ૫॥

નવદ્વારમલસ્રાવં સદા કાલે સ્વભાવજમ્ ।
દુર્ગન્ધં દુર્મલોપેતં સ્પૃષ્ટ્વા સ્નાનં વિધીયતે ॥ ૬॥

માતૃસૂતકસમ્બન્ધં સૂતકે સહ જાયતે ।
મૃતસૂતકજં દેહં સ્પૃષ્ટ્વા સ્નાનં વિધીયતે ॥ ૭॥

અહમ્મમેતિ વિણ્મૂત્રલેપગન્ધાદિમોચનમ્ ।
શુદ્ધશૌચમિતિ પ્રોક્તં મૃજ્જલાભ્યાં તુ લૌકિકમ્ ॥ ૮॥

ચિત્તશુદ્ધિકરં શૌચં વાસનાત્રયનાશનમ્ ।
જ્ઞાનવૈરાગ્યમૃત્તોયૈઃ ક્ષાલનાચ્છૌચમુચ્યતે ॥ ૯॥

અદ્વૈતભાવનાભૈક્ષમભક્ષ્યં દ્વૈતભાવનમ્ ।
ગુરુશાસ્ત્રોક્તભાવેન ભિક્ષોર્ભૈક્ષં વિધીયતે ॥ ૧૦॥

વિદ્વાન્સ્વદેશમુત્સૃજ્ય સંન્યાસાનન્તરં સ્વતઃ ।
કારાગારવિનિર્મુક્તચોરવદ્દૂરતો વસેત્ ॥ ૧૧॥

અહઙ્કારસુતં વિત્તભ્રાતરં મોહમન્દિરમ્ ।
આશાપત્નીં ત્યજેદ્યાવત્તાવન્મુક્તો ન સંશયઃ ॥ ૧૨॥

મૃતા મોહમયી માતા જાતો બોધમયઃ સુતઃ ।
સૂતકદ્વયસમ્પ્રાપ્તૌ કથં સન્ધ્યામુપાસ્મહે ॥ ૧૩॥

હૃદાકાશે ચિદાદિત્યઃ સદા ભાસતિ ભાસતિ ।
નાસ્તમેતિ ન ચોદેતિ કથં સન્ધ્યામુપાસ્મહે ॥ ૧૪॥

એકમેવાદ્વિતીયં યદ્ગુરોર્વાક્યેન નિશ્ચિતમ્ ।

એતદેકાન્તમિત્યુક્તં ન મઠો ન વનાન્તરમ્ ॥ ૧૫॥

અસંશયવતાં મુક્તિઃ સંશયાવિષ્ટચેતસામ્ ।
ન મુક્તિર્જન્મજન્માન્તે તસ્માદ્વિશ્વાસમાપ્નુયાત્ ॥ ૧૬॥

કર્મત્યાગાન્ન સંન્યાસો ન પ્રેષોચ્ચારણેન તુ ।
સન્ધૌ જીવાત્મનોરૈક્યં સંન્યાસઃ પરિકીર્તિતઃ ॥ ૧૭॥

વમનાહારવદ્યસ્ય ભાતિ સર્વેષણાદિષુ ।
તસ્યાધિકારઃ સંન્યાસે ત્યક્તદેહાભિમાનિનઃ ॥ ૧૮॥

યદા મનસિ વૈરાગ્યં જાતં સર્વેષુ વસ્તુષુ ।
તદૈવ સંન્યસેદ્વિદ્વાનન્યથા પતિતો ભવેત્ ॥ ૧૯॥

દ્રવ્યાર્થમન્નવસ્ત્રાર્થં યઃ પ્રતિષ્ઠાર્થમેવ વા ।
સંન્યસેદુભયભ્રષ્ટઃ સ મુક્તિં નાપ્તુમર્હતિ ॥ ૨૦॥

ઉત્તમા તત્ત્વચિન્તૈવ મધ્યમં શાસ્ત્રચિન્તનમ્ ।
અધમા મન્ત્રચિન્તા ચ તીર્થભ્રાન્ત્યધમાધમા ॥ ૨૧॥

અનુભૂતિં વિના મૂઢો વૃથા બ્રહ્મણિ મોદતે ।
પ્રતિબિમ્બિતશાખાગ્રફલાસ્વાદનમોદવત્ ॥ ૨૨॥

ન ત્યજેચ્ચેદ્યતિર્મુક્તો યો માધુકરમાતરમ્ ।
વૈરાગ્યજનકં શ્રદ્ધાકલત્રં જ્ઞાનનન્દનમ્ ॥ ૨૩॥

ધનવૃદ્ધા વયોવૃદ્ધા વિદ્યાવૃદ્ધાસ્તથૈવ ચ ।
તે સર્વે જ્ઞાનવૃદ્ધસ્ય કિંકરાઃ શિષ્યકિંકરાઃ ॥ ૨૪॥

યન્માયયા મોહિતચેતસો મા-
માત્માનમાપૂર્ણમલબ્ધવન્તઃ ।
પરં વિદગ્દોદરપૂરણાય
ભ્રમન્તિ કાકા ઇવ સૂરયોઽપિ ॥ ૨૫॥

પાષાણલોહમણિમૃણ્મયવિગ્રહેષુ
પૂજા પુનર્જનનભોગકરી મુમુક્ષોઃ ।
તસ્માદ્યતિઃ સ્વહૃદયાર્ચનમેવ કુર્યા-
દ્બાહ્યાર્ચનં પરિહરેદપુનર્ભવાય ॥ ૨૬॥

અન્તઃપૂર્ણો બહિઃપૂર્ણઃ પૂર્ણકુમ્ભ ઇવાર્ણવે ।

અન્તઃશૂન્યો બહિઃશૂન્યઃ શૂન્યકુમ્ભ ઇવામ્બરે ॥ ૨૭॥

મા ભવ ગ્રાહ્યભાવાત્મા ગ્રાહકાત્મા ચ મા ભવ ।
ભાવનામખિલં ત્યક્ત્વા યચ્છિષ્ટં તન્મયો ભવ ॥ ૨૮॥

દ્રષ્ટ્દર્શનદૃશ્યાનિ ત્યક્ત્વા વાસનયા સહ ।
દર્શનપ્રથમાભાસમાત્માનં કેવલં ભજ ॥ ૨૯॥

સંશાન્તસર્વસંકલ્પા યા શિલાવદવસ્થિતિઃ ।
જાગ્રન્નિદ્રાવિનિર્મુક્તા સા સ્વરૂપસ્થિતિઃ પરા ॥ ૩૦॥

ઇતિ દ્વિતીયોઽધ્યાયઃ ॥ ૨॥

અહમસ્મિ પરશ્ચાસ્મિ બ્રહ્માસ્મિ પ્રભવોઽસ્મ્યહમ્ ।
સર્વલોકગુરુશ્ચામિ સર્વલોકેઽસ્મિ સોઽસ્મ્યહમ્ ॥ ૧॥

અહમેવાસ્મિ સિદ્ધોઽસ્મિ શુદ્ધોઽસ્મિ પરમોઽસ્મ્યહમ્ ।
અહમસ્મિ સોમોઽસ્મિ નિત્યોઽસ્મિ વિમલોઽસ્મ્યહમ્ ॥ ૨॥

વિજ્ઞાનોઽસ્મિ વિશેષોઽસ્મિ સોમોઽસ્મિ સકલોઽસ્મ્યહમ્ ।
શુભોઽસ્મિ શોકહીનોઽસ્મિ ચૈતન્યોઽસ્મિ સમોઽસ્મ્યહમ્ ॥ ૩॥

માનાવમાનહીનોઽસ્મિ નિર્ગુણોઽસ્મિ શિવોઽસ્મ્યહમ્ ।
દ્વૈતાદ્વૈતવિહીનોઽસ્મિ દ્વન્દ્વહીનોઽસ્મિ સોઽસ્મ્યહમ્ ॥ ૪॥

ભાવાભાવવિહીનોઽસ્મિ ભાસાહીનોઽસ્મિ ભાસ્મ્યહમ્ ।
શૂન્યાશૂન્યપ્રભાવોઽસ્મિ શોભનાશોભનોઽસ્મ્યહમ્ ॥ ૫॥

તુલ્યાતુલ્યવિહીનોઽસ્મિ નિત્યઃ શુદ્ધઃ સદાશિવઃ ।
સર્વાસર્વવિહીનોઽસ્મિ સાત્ત્વિકોઽસ્મિ સદાસ્મ્યહમ્ ॥ ૬॥

એકસઙ્ખ્યાવિહીનોઽસ્મિ દ્વિસઙ્ખ્યાવાહનં ન ચ ।
સદસદ્ભેદહીનોઽસ્મિ સઙ્કલ્પરહિતોસ્મ્યહમ્ ॥ ૭॥

નાનાત્મભેદહીનોઽસ્મિ હ્યખણ્ડાનન્દવિગ્રહઃ ।
નાહમસ્મિ ન ચાન્યોઽસ્મિ દેહાદિરહિતોઽસ્મ્યહમ્ ॥ ૮॥

આશ્રયાશ્રયહીનોઽસ્મિ આધારરહિતોઽસ્મ્યહમ્ ।
બન્ધમોક્ષાદિહીનોઽસ્મિ શુદ્ધબ્રહ્માસ્મિ સોઽસ્મ્યહમ્ ॥ ૯॥

ચિત્તાદિસર્વહીનોઽસ્મિ પરમોઽસ્મિ પરાત્પરઃ ।

સદા વિચારરૂપોઽસ્મિ નિર્વિચારોઽસ્મિ સોઽસ્મ્યહમ્ ॥ ૧૦॥

અકારોકારરૂપોઽસ્મિ મકરોઽસ્મિ સનાતનઃ ।
ધાતૃધ્યાનવિહીનોઽસ્મિ ધ્યેયહીનોઽસ્મિ સોઽસ્મ્યહમ્ ॥ ૧૧॥

સર્વપૂર્ણસ્વરૂપોઽસ્મિ સચ્ચિદાનન્દલક્ષણઃ ।
સર્વતીર્થસ્વરૂપોઽસ્મિ પરમાત્માસ્મ્યહં શિવઃ ॥ ૧૨॥

લક્ષ્યાલક્ષ્યવિહીનોઽસ્મિ લયહીનરસોઽસ્મ્યહમ્ ।
માતૃમાનવિહીનોઽસ્મિ મેયહીનઃ શિવોઽસ્મ્યહમ્ ॥ ૧૩॥

ન જગત્સર્વદ્રષ્ટાસ્મિ નેત્રાદિરહિતોસ્મ્યહમ્ ।
પ્રવૃદ્ધોઽસ્મિ પ્રબુદ્ધોઽસ્મિ પ્રસન્નોઽસ્મિ પરોઽસ્મ્યહમ્ ॥ ૧૪॥

સર્વેન્દ્રિયવિહીનોઽસ્મિ સર્વકર્મકૃદપ્યહમ્ ।
સર્વવેદાન્તતૃપ્તોઽસ્મિ સર્વદા સુલભોઽસ્મ્યહમ્ ॥ ૧૫॥

મુદિતામુદિતાખ્યોઽસ્મિ સર્વમૌનફલોઽસ્મ્યહમ્ ।
નિત્યચિન્માત્રરૂપોઽસ્મિ સદા સચ્ચિન્મયોઽસ્મ્યહમ્ ॥ ૧૬॥

યત્કિઞ્ચિદપિ હીનોઽસ્મિ સ્વલ્પમપ્યતિ નાસ્મ્યહમ્ ।
હૃદયગ્રન્થિહીનોઽસ્મિ હૃદયામ્ભોજમધ્યગઃ ॥ ૧૭॥

ષડ્વિકારવિહીનોઽસ્મિ ષટ્કોષરહિતોઽસ્મ્યહમ્ ।
અરિષડ્વર્ગમુક્તોઽસ્મિ અન્તરાદન્તરોઽસ્મ્યહમ્ ॥ ૧૮॥

દેશકાલવિમુક્તોઽસ્મિ દિગમ્બરસુખોઽસ્મ્યહમ્ ।
નાસ્તિ નાસ્તિ વિમુક્તોઽસ્મિ નકારહિતોઽસ્મ્યહમ્ ॥ ૧૯॥

અખણ્ડાકાશરૂપોઽસ્મિ હ્યખણ્ડાકારમસ્મ્યહમ્ ।
પ્રપઞ્ચમુક્તચિત્તોઽસ્મિ પ્રપઞ્ચરહિતોઽસ્મ્યહમ્ ॥ ૨૦॥

સર્વપ્રકાશરૂપોઽસ્મિ ચિન્માત્રજ્યોતિરસ્મ્યહમ્ ।
કાલત્રયવિમુક્તોઽસ્મિ કામાદિરહિતોઽસ્મ્યહમ્ ॥ ૨૧॥

કાયિકાદિવિમુક્તોઽસ્મિ નિર્ગુણઃ કેવલોઽસ્મ્યહમ્ ।
મુક્તિહીનોઽસ્મિ મુક્તોઽસ્મિ મોક્ષહીનોઽસ્મ્યહમ્ સદા ॥ ૨૨॥

સત્યાસત્યાદિહીનોઽસ્મિ સન્માત્રાન્નાસ્મ્યહં સદા ।
ગન્તવ્યદેશહીનોઽસ્મિ ગમનાદિવિવર્જિતઃ ॥ ૨૩॥

સર્વદા સમરૂપોઽસ્મિ શાન્તોઽસ્મિ પુરુષોત્તમઃ ।
એવં સ્વાનુભવો યસ્ય સોઽહમસ્મિ ન સંશયઃ ॥ ૨૪॥

યઃ શ‍ૃણોતિ સકૃદ્વાપિ બ્રહ્મૈવ ભવતિ સ્વયમિત્યુપનિષત્ ॥

ઇતિ તૃતીયોઽધ્યાયઃ ॥ ૩॥

ૐ આપ્યાન્તુ મામાઙ્ગાનિ વાક્પ્રાણશ્ચક્ષુઃ શ્રોત્ર-
મથો બલમિન્દ્રિયાણિ ચ । સર્વાણિ સર્વં બ્રહ્મોપનિષદં
માહં બ્રહ્મ નિરાકુર્યાં મા મા બ્રહ્મ નિરાકરો-
દનિરાકરણમસ્ત્વનિરાકરણં મેસ્તુ તદાત્મનિ નિરતે ય
ઉપનિષત્સુ ધર્માસ્તે મયિ સન્તુ તે મયિ સન્તુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇતિ મૈત્રેય્યુપનિષત્સમાપ્તા ॥

*Maitreyi Upanishad*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*